# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री-1 (SEM-2)** **प्रश्नपत्रम् – 6** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.C.1.2.4(New/Old)** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –16/04/2019 सन्दर्भग्रन्थः – वाल्मीकिरामायणे सुन्दरकाण्डः 35-68

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः सप्रसङ्गसन्दर्भसहितो भावार्थः लिखत।** **10**

(1) सलक्षणं राघवमातिमर्दनं दिशागजं मत्तमिव व्यवस्थितम्।
सहेतको वानरमुख्य संयुगे युगान्तसूर्यप्रतिमं शरार्चिषम्॥

(2) मणिवरमुपगृह्य तं महार्हं जनकनृपात्मजया धृतं प्रभावात्।
गिरिवरपवनावधूतमुक्तः सुखितमनाः प्रतिसंक्रमं प्रपेदे॥

(3) नास्मिंश्चिरं वत्स्यसिदेविदेशे रक्षोगणैरध्युषितेऽतिरौद्रे।
न ते चिरादागमनं प्रियस्य क्षमस्व मत्संगमकालमात्रम्॥

**प्रश्नः-2 एकस्य सविस्तरं लिख्यताम्।** **10**

(1) सीताहनुमद् संवादं यथाग्रन्थं वर्णयत।

(2) सीतासंदेशं श्रुत्वा हनुमद्द्वारा प्रदत्तं आश्वासनं यथाग्रन्थं वर्णयत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः सप्रसङ्गसन्दर्भसहितो भावार्थः लिखत।** **10**

(1) इदं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च।
ब्रूयास्तु रामस्य गतः समीपम् शिवश्च तेऽध्वास्तु हरिप्रवीर॥

(2) न साम रक्षःसु गुणाय कल्पते न दानमर्थोपचितेषु युज्यते।
न भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेष ममेह रोचते॥

(3) रराज भूमिर्न तताप भानुमान् ववौ न वायुः प्रचचाल चाचलः।
कपेः कुमारस्य च वीर्यसंयुगं ननाद च द्यौरुदधिश्च चुक्षुभे॥

**प्रश्नः-4 एकस्य सविस्तरं लिख्यताम्।** **10**

(1) लङ्कायां प्रकटीतं हनुमद्युद्धपराक्रमं ग्रन्थानुसारं वर्णयत।

(2) हनुमद् कथितः रावणसभायां श्रीरामचन्द्रस्य गुणानां वर्णनं कुरुत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः सप्रसङ्गसन्दर्भसहितो भावार्थः लिखत।** **10**

(1) निशाचराणामधियोऽनुजस्य विभीषणस्योत्तम वाक्यमिष्टम्।
जग्राह बुद्ध्या सुरलोकशत्रुर्महाबलो राक्षसराजमुख्यः॥

(2) स तान् निहत्वा रणचण्डविक्रमः समीक्षमाणः पुनरेव लङ्काम्।
प्रदीप्तलाङ्गूलकृतार्चिमाली प्रकाशितादित्य द्वार्चिमाली॥

(3) प्रीतिस्फीताक्षो सम्प्रहृष्टौ कुमारौ दृष्ट्वा सिद्धार्थौ वानराणां च राजा।
अङ्गैः प्रहृष्टः कार्यसिद्धिं विदित्वा बाह्वोरासन्नामतिमात्रं ननन्द॥

**प्रश्नः-6 एकस्य सविस्तरं लिख्यताम्।** **10**

(1) न दूताः वध्याः विभीषणोक्तिः यथाग्रन्थं चर्चयत।

**(2)** सुग्रीवस्य मधुवने वानरैः कृतो उत्पातः आनन्दाभिव्यक्तिः यथाग्रन्थं वर्णयत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 दशानां लघूत्तराणि लिखत।** **10**

(1) कः धर्मभृतां श्रेष्ठः?

(2) रावणभार्या नाम किम्?

(3) छायारूपाणि का?

(4) का नागमाता?

(5) कौ अश्विनीपुत्रौ?

(6) स्नुषा शब्दस्य कोऽर्थः?

(7) सुग्रीवस्य वनस्यनाम किम्?

(8) सुग्रीवस्य मातुलः कः?

(9) सुग्रीवस्य पितुः नाम किम्?

(10) शाखामृगः इति कः?

(11) अङ्गदस्य पितुः नाम किम्?

(12) जयन्तः कस्य पुत्रः?

(13) कः लाञ्चनमयो पर्वतः?

(14) अभिज्ञान शब्दस्य कोऽर्थः?

(15) कः वाच्यावाच्यं न जानाति?